# दुर्गा सूक्तम्

## durgā sūktam

ॐ जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः॥ १॥

om jātavedase sunavāma soma-marātīyato nidahāti
vedaḥ | sa naḥ parṣadati durgāṇi viśvā nāveva
sindhuṁ duritā'tyagniḥ || 1||

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्।
दुर्गां देवीगं शरणमहं प्रपद्ये सुतरसि तरसे नमः॥ २॥

tāmagnivarṇāṁ tapasā jvalantīṁ vairocanīṁ
karmaphaleṣu juṣṭām | durgāṁ devīgṁ śaraṇamahaṁ
prapadye sutarasi tarase namaḥ || 2||

अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥ ३॥

agne tvaṁ pārayā navyo asmānthsvastibhirati
durgāṇi viśvā | pūśca pṛthvī bahulā na urvī bhavā
tokāya tanayāya śaṁyoḥ || 3||

विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरिताऽतिपर्षि ।

अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ ४ ॥

viśvāni no durgahā jātavedaḥ sindhunna nāvā duritā'tiparṣi | agne atrivanmanasā gṛṇāno'smākaṁ bodhyavitā tanūnām || 4||

पृतना जितगं सहमानमुग्रमग्निगं हुवेम परमाथ्सधस्थात् ।

स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ॥ ५ ॥

pṛtanā jitagṁ sahamānamugramagnigṁ huvema paramāthsadhasthāt | sa naḥ parṣadati durgāṇi viśvā kṣāmaddevo atiduritā'tyagniḥ || 5||

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।

स्वाञ्चाऽग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥ ६ ॥

pratnoṣika mīḍyo adhvareṣu sanācca hotā navyaśca satsi | svāñcā'gne tanuvaṁ piprayasvāsmabhyaṁ ca saubhagamāyajasva || 6||

गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम ।

नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥ ७ ॥

gobhirjuṣṭamayujo niṣiktaṁ tavendra viṣṇoranusañcarema |
nākasya pṛṣṭhamabhi saṁvasāno vaiṣṇavīṁ loka iha
mādayantām || 7||

ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥

om kātyāyanāya vidmahe kanyakumāri dhīmahi |

tanno durgiḥ pracodayāt ||

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ ||